# MASTER OF ARTS EXAMINATION, 2024

**(1st Year, 1st Semester)**

**SANSKRIT**

**COURSE : IV**

**[ Sanskrit Poetry ]**

*Time* : 2 Hours *Full Marks* : 30

*The figures in the margin indicate full marks.*

## क— विभाग:

१. अधोनिर्दिष्टाः सर्वे प्रश्नाः संस्कृतभाषया देवनागरीलिप्या च समाधेयाः–

(क) मेघस्य यात्राकाले ये खलु राजहंसाः सहायाः भविष्यन्ति ते कीदृशाः? 1

(ख) मुग्धसिद्धाङ्गनाः मेघं दृष्ट्वा किं करिष्यन्ति? 1

(ग) अलकानगर्यां मन्मथः कथं चापं न वहति? 1

(घ) सुरगिरा अर्था लेखनीयाः– 0.5×4=2

हरितकपिशम्, वृतयः, वान्तवृष्टिः, कनकसिकता

२. सुगगिरा देवनागरीलिप्या च भावार्थो लेखनीयः– 5

खिन्नः खिन्नः शिखरिषु पदं न्यस्य गन्तासि यत्र।

क्षीणः क्षीणः परिलघु पयः स्रोतसां चोपयुज्य।।

**( अथवा )**

सूर्यापाये न खलु कमलं पुष्यति स्वामभिख्याम्।

३. अलकानगर्याः शोभा श्लोकपञ्चकमवलम्ब्य वर्ण्यताम्। 5

**( अथवा )**

मेघदूते वर्णितस्य दशार्णः विशाला चेति स्थानद्वयस्य वैशिष्ट्यं स्वभाषया लिख्यताम्।

**ख — विभागः**

४. बुद्धचरितमिति महाकाव्यस्य संवेगोत्पत्तिरित्यभिहिते तृतीयसर्गे पुरनारीणां वर्णनं

यथोपन्यस्तं कविना तथा स्वकीयभाषया व्याख्याताम्। 6

**( अथवा )**

'क एष भोः सुत नरोऽभ्युपेतः केशैः सितैर्यष्टिविषक्तहस्तः।

भ्रूसंवृताक्षः शिथिलानताङ्‌ः किं विक्रियैषा प्रकृतिर्यदृच्छा?'

— कं प्रति कस्य चेयमुक्तिः? श्लोकेऽस्मिन् वर्णितं तत्त्वमवलम्ब्य कश्चन निबन्धे रचनीयः। 1+5=6





५. अधोनिर्दिष्टयोः श्लोकयोः **अन्यतरस्य** सप्रसङ्गं व्याख्या कार्या– 5

(क) अथाज्ञया भर्तृसुतस्य तस्य निवर्तयामास रथं नियन्ता।

ततः कुमारो भवनं तदेव चिन्तावशः शून्यमिव प्रपेदे।।

(ख) इति श्रुतार्थः स विषण्णचेताः प्रावेपताम्बूर्मिगतः शशीव।

इदं च वाक्यं करुणायमानः प्रोवाच किञ्चिन्मृदुना स्वरेण।।

६. संस्कृतभाषया देवनागरीलिप्या च समाधीयताम् – 1.5×2=3

(क) वपुषा श्रिया च जाज्वल्यमानं राजसुतं दृष्ट्वा स्त्रियः किमवोचन्?

(ख) जराविषयकं तत्त्वं संरक्ष्यमपि कथं रथप्रणेता राजपुत्राय निवेदयामास?

**7.** पर्यायशब्दो लिख्यताम्– 0.5×2=1

कलापाः, विश्रम्भम्।

★★★